© 2018 IJSRST | Volume 4 | Issue 7 | Print ISSN: 2395-6011 | Online ISSN: 2395-602X

# आधुनिकशिक्षायां प्रकृतिवादस्य प्रभावः



**डॉ. जितेन्द्रकुमाररायगुरुः**
**संविदाध्यापकः**
**शिक्षाशास्त्रविभागः**
**एकलव्यपरिसरः**
**अगरतला,त्रिपुरा**

**शोधसारः** - शिक्षा देश-कालानुसारंच परिवर्त्ततइत्यत्र नास्ति विप्रतिप्रत्तिः। शिक्षायां नैकानां वादानां दार्शनिकानां शिक्षाशास्त्रीणाञ्च प्रभावः दरीदृश्यते। वादेषु शिक्षायां प्रकृतिवादस्य प्रभावः नितरां द्रष्टुं शक्यते। अस्य वादस्य प्रवर्त्तकः रूसो वर्त्तते। अस्य महोदयस्य शैक्षिकदर्शनं वर्त्तमानशैक्षिकप्रक्रियां सुष्ठुः अवलोक्यते।यद्यपि रूसो महोदयस्य चिन्तनं शिक्षायां नितरां प्रभाववयति तथापि केचन विशिष्टविचाराः साम्प्रतं शिक्षायां सुतराम् आवश्यकाःवर्त्तन्ते। रूसो महोदयेन प्रचलितशिक्षायाः दोषान् संवीक्ष्य तस्याः स्थाने निषेधात्मकशिक्षां समर्थितम् । निशेधात्मकशिक्षा एव प्रकृतिवादस्य प्रमुखः विषयः।रूसोमहोदयस्यानुसारं निषेधात्मकशिक्षायाः उद्देश्यं बालकस्य प्रकृतिं प्रवृत्तिं शक्तिञ्च सम्यक् अवबुध्य तस्य क्षमतानुसारं शिक्षा प्रदातव्या इति। एतादृशी शिक्षा ज्ञानेन्द्रियाणां विकासे सहायिका भवति। निषेधात्मकशिक्षा सा शिक्षा भवति या प्रत्यक्षरूपेण ज्ञानप्रदानात्पूर्वं तस्य ज्ञानस्य यानि अङ्गानि साधनानि वा सन्ति तानि सक्षमं कर्त्तुं प्रयासं करोति, इन्द्रियाणां समुचिताभ्यासेन विवेकपूर्णव्यवहाराय प्रयत्नं करोति च।निषेधात्मकशिक्षायां सत्यस्य शिक्षा न दीयते अपितु असत्यात् दूरे स्थातुं निर्देशः क्रियते।प्राम्भिकशिक्षा पूर्णरूपेण निषेधात्मकशिक्षा भवेदिति। रूसो महोदयः स्वीय एमील इत्याख्ये ग्रन्थे अलिखत् यत्–बालक्य प्रथमशिक्षा विशुद्धरूपेण निषेधात्मकशिक्षा भवेत्। अत्र सद्गुणानां च शिक्षणं कदापि न भवेत्, परं बालकस्य मनः अवगुणात् असत्यात् कथं दूरे भवेत्, तदर्थं यत्नः करणीयः। बालकः स्वयमेव स्वाभाविकरूपेण ज्ञानं प्राप्नोति। रूसोमहोदयस्य निषेधात्मकशिक्षायां पुस्तकीयज्ञानस्य विरोधः कृतः वर्त्तते । इन्द्रियप्रशिक्षणस्य महत्त्वं स्वीकृतम्। शिक्षायां निर्देशप्रदानस्य विरोधः स्वानुभवेन अधिगमस्य महत्त्वं स्वीकृतम्। बालकः न कस्यापि दासः भवति, अपितु सः स्वतन्त्रस्सन् स्वस्य कार्यं कर्त्तुं समर्थः वर्त्तते। इत्थमेतानि वैशिष्ट्यानि निषेधात्मकशिक्षायाः वर्त्तन्ते। एवञ्च आधुनिकसमाजे प्रकृतिवादस्य प्रभावः कथं वर्त्तत इति शोधपत्रेऽस्मिन् समुपस्थाप्यते।

**प्रमुखशब्दाः** – निश्चयात्मकशिक्षा, निषेधात्मकशिक्षा, प्रकृतिमनुसरः, पुस्तकीयज्ञानस्य विरोधः, प्रगतिशीलशिक्षा, बालकेन्द्रितशिक्षा, इन्द्रियप्रशिक्षणम्, पूर्णस्वातन्त्र्यञ्च।

**विषयप्रवेशः –**

शिक्षायाः सम्प्रत्ययः अत्यन्तं व्यापकः भवति। यं सम्प्रत्ययं दार्शनिकैः विचारकैश्च काल-परिस्थिति-देशानुसारेण अवगन्तुं प्रयासः विहितः। प्रयासेऽस्मिन् यद्यपि वैविध्यता वर्त्तते तथापि सर्वैः शिक्षायाः सामान्यमर्थः स्वीकृतः। शिक्षा एका तादृशी ज्योतिः या बालकाय नवनवानुभवान् प्रदाय तं सुयोग्यं निर्माति। एतेन सः स्वीयवातावरणेन सह सामञ्जस्यं स्थापयन् स्वस्मिन् निहितशक्तीः योग्यताश्च पूर्णतया विकासयति। परिणामतः स स्वयोग्यतानुसारं स्वपरिवारस्य समाजस्य राष्ट्रस्य च विशिष्टक्षेत्रे योगदानं कर्त्तुं शक्नोति। औद्योगिकक्रान्तिकारणात् आधुनिकयुगस्य प्रारम्भः जातः। युरोप-अमेरिकादिदेशानामौद्योगिकक्रान्तिद्वारा शिक्षायाः पूर्वनिश्चितोद्देश्यानां शैक्षिकमूल्यानाञ्च अवहेलना सञ्जाता। शिक्षा चरमसत्तायाः विचारान् परित्यज्य द्रव्याश्रिता जाता। एवम्प्रकारेण शिक्षायाः उद्देश्येषुनैतिकतायाः प्राप्तिः आध्यात्मिकतायाः सम्प्राप्तिर्वा लुप्ता। अर्थात् तस्यां धर्मप्रधानतायाः ह्रासः सञ्जातः। शिक्षायाः उद्देश्येषु धार्मिकतायाः ह्रासाय नैके शिक्षाशास्त्रिणः प्रयासम्कुर्वन्। एतेषु रूसो महोदयः अन्यतमः। अस्य महानुभवस्य शिक्षादर्शनं सम्पूर्णशिक्षाप्रक्रियां प्रभावयति। रूसोमहोदयस्य चिन्तनमासीत् प्रचलितशिक्षाव्यवस्था न केवलं बालकस्य जीवनं दूषितं करोति अपितु एतादृशीं शिक्षां सम्प्राप्य बालकः स्वजीवने किमपि कार्यं कर्त्तुं न शक्नोति। यतोहि इयं शिक्षा बालकस्य सर्वाङ्गीणविकासं न साधयति। अतः रूसोमहोदयेन तदानीन्तनसमाजे प्रचलितशिक्षाव्यवस्थां द्विधा विभजितम्। निश्चयात्मकशिक्षा निषेधात्मकशिक्षा च।

**1.निश्चयात्मिका शिक्षा** – रूसोमहोदयेन तदानीन्तनसमाजे प्रचलितशिक्षां निश्चयात्मिका शिक्षेति उक्तम्। अस्याः शिक्षायाः न्यूनतामभिलक्ष्य तेन एनां शिक्षां निराकृतम्। निश्चयात्मिका शिक्षा बालकस्य बौद्धिकविकासं प्रति ध्यानं ददाति, परं तस्य शारीरिकशक्तेः अन्यशक्तीनाञ्च अवहेलनां करोति। निश्चयात्मिका शिक्षायाः अर्थं स्पष्टयन्नाह – निश्चयात्मिका शिक्षा सा शिक्षा वर्त्तते या वास्तविकसमयात्पूर्वं मस्तिष्कं परिपक्वं विधाय बालकं प्रौढमनुष्यनिर्माणाय प्रेरयति। निश्चयात्मिकाशिक्षायां चारित्रिकविकासाय नैतिकताविकासाय च या शिक्षा प्रदीयते सा बालमनोविज्ञाननियमानुसारं न भवति। निश्चयात्मिका शिक्षा मनुष्यस्य प्रकृतिं सम्यक्तया नावगच्छति, तथापि तां बलात् संशोधयितुं वाञ्छति। एनं विचारं रूसो न स्वीकृतवान् अपितु निश्चयात्मकशिक्षायाः मुक्तकण्ठेन विरोधं कृतवान्। तस्याः स्थाने निषेधात्मिका शिक्षायाः समर्थनमकरोत्। निश्चयात्मिकाशिक्षायाः विरोधं कृत्वा तेनोक्तम् –

निश्चयात्मिका शिक्षा बालकं बलात् बन्धाति। निश्चयात्मिका शिक्षा काल्पनिकसुखाय बालकं प्रेरयति। काल्पनिकसुखान्वेषणे यतमानः बालकः सर्वदा दुःखमयं जीवनं यापयति। अतः रूसो एनां शिक्षां निराकरोति। अधोलिखितविषयेषु निश्चयात्मिकाशिक्षा महन्महत्त्वं ददाति अतः रूसो अस्याः शिक्षायाः विरोधमकरोत्।

- पुस्तकीयज्ञानम्।
- कर्त्तव्यपरायणता-नैतिकता-धार्मिकतासु महत्त्वम्।
- स्वतन्त्रतासिद्धान्तस्योपेक्षा।
- कठोरानुशासनम्।
- प्रौढाणां कार्यस्य शिक्षा।

- समुचितस्वभावविकासेषु महत्त्वम्।
- कृत्रिमसमाजे नागरिकनिर्माणाय शिक्षा च।

2. **निषेधात्मकशिक्षा** – तदानीन्तनसमाजे प्रचलितनिश्चयात्मकशिक्षायाः विरोधं कृत्वा रूसोमहोदयेन निषेधात्मकशिक्षायाः प्रचारः कृतः। निषेधात्मकशिक्षायाः उद्देश्यं भवति बालकस्य प्रकृति-प्रवृत्ति-शक्त्यानुसारेण शिक्षा प्रदेयेति। इयं ज्ञानेन्द्रियाणां विकासे सहायिका भवति। इयं बालकाय प्रौढगुणान् प्रददाति, किन्तु दुर्गुणेभ्यः रक्षति। रूसोमहोदयेन तां शिक्षां निषेधात्मकशिक्षेति उक्तम् - या प्रत्यक्षरूपेण ज्ञानप्रदानात्पूर्वं तस्य ज्ञानस्य यानि अङ्गानि साधनानि वा सन्ति तानि समर्थं कृत्वा इन्द्रियाणां समुचिताभ्यासेन विवेकक्षमतायाः विकासाय प्रयत्नं करोति। निषेधात्मकशिक्षायां सत्यस्य शिक्षा न दीयते अपितु असत्यात् दूरे स्थातुं निर्देशः प्रदीयते। इयं शिक्षा बालकं तं मार्गं प्रति प्रेरयति, यत् सत्यं प्रति गमयति। इत्थं निषेधात्मकशिक्षायाः आशयः वर्त्तते यत् बालकं तस्य आयु-शक्ति-रूचि-प्रवृत्तिनामनुसारेण शिक्षा प्रदेया । रूसोमहोदयेन निषेधात्मकशिक्षायाः व्यवस्था बालकस्य बाल्यावस्थार्थं समर्थितम्। तस्य चिन्तनमासीत् बालकः पूर्णरूपेण भद्रः भवति, तस्मिन् न कोऽपि दुर्गुणः वर्त्तते। अतः तस्य शिक्षाऽपि स्वाभाविकपरिवेशे अकृत्रिमपरिवेशे वा भवेत्। प्रारम्भे बालके न कोऽपि दुराचारः न भवति किन्तु दूषितसमाज एव बालकं दुराचारीं करोति। अतः प्रारम्भिकशिक्षा नूनं निषेधात्मकशिक्षा भवेत्। किञ्च इयं शिक्षा सत्यसिद्धान्तस्य अधिगमाय न स्यात् । एतदतिरिच्य निषेधात्मकशिक्षायाः निम्नोक्ताः विशेषताः भवन्ति –

- पुस्तकीयज्ञानस्य विरोधः।
- इन्द्रियप्रशिक्षणम्।
- स्वानुभवेन अधिगमः।
- सामाजिकशिक्षायाः विरोधः।
- बालकेन्द्रितशिक्षा च ।

**निषेधात्मकशिक्षायाः शैक्षिकसम्प्रत्ययः** –

**शिक्षायाः अर्थः** – निषेधात्मकशिक्षानुसारं शिक्षायाः अर्थः बालकस्य सर्वाङ्गीणविकासः। बालकस्य ज्ञानेन्द्रियाणां विकासं कृत्वा शिक्षायाः व्यवस्था करणीया। बालकस्य अधिगमस्य प्राचीननियमानुसारं शिक्षा न दातव्या अपितु बालमनोविज्ञानस्य नियमानुसारं तस्य रूचि-शक्ति-क्षमता-प्रवृत्तिनामनुसारं शिक्षा प्रदेया।रूसोमहोदयानुसारं शिक्षायाः त्रीणि मूलतत्त्वानि सन्ति –

**1.प्रकृतिः** – बालकस्य शिक्षा तस्य आवश्यकतानुसारं स्वाभाविकक्षमतानुसारं स्यात्।

**2. मानवः** – व्यक्तिः समाजे समाजः व्यक्तौ च कीदृशः प्रभावः स्थापयति।

**3.पदार्थः** – बालकः वातावरणेन अन्तःक्रियां सम्पाद्य अधिगच्छति। पदार्थैः प्राप्ता शिक्षा प्रकृत्या प्राप्ता शिक्षा च समीचीना न भवति। एतेषां त्रयाणां योगेन निर्मितशिक्षा एव वास्तविकशिक्षा भवति। निषेधात्मकशिक्षायां बालकेन

किं करणीयम्? इति शिक्षा न दीयते अपितु सः यत्किमपि कार्यं करोति तं तस्मिन् कार्ये पूर्णस्वातन्त्र्यं भवेत्। निषेधात्मकशिक्षायाः समर्थयन्नाह –

**1. प्रकृतिमनुसरः** –

अस्य तात्पर्यं पाशविकताचरणमिति न प्रत्युत बालकस्य सर्वाङ्गीणविकासार्थं योग्यावसरप्रदानमिति। बालकेन न किञ्चित् नूतनं जीवने अभ्यसनीयम्। प्रकृत्या यथा वर्त्तते तथैव वर्तितव्यम्। सुसभ्यः प्राकृतिकपरिवेशे नोषित्वा कृत्रिमपरिवेशे वसतिस्थापनं करोति। तेन जीवनं कष्टमयं भवति। यदि मनुष्यः प्रकृतौ वसति तर्हि न दुःखं न वा क्लेशं भवति। प्रकृतिः यथा सरलतया बालकं शिक्षयति तथा विद्यालयेऽपि शिक्षणीयम्।

**2.पुस्तकीयज्ञानस्य विरोधः** –

पुस्तकीयज्ञानं कृत्रिमं भवति, तेन अधिगमः स्पष्टं न जायते। पुस्तकपाठनेन बालकस्य वास्तविकज्ञानं न भवति, यतोहि यत् किमपि सः पठति तस्य वास्तविकज्ञानं प्रत्यक्षतया न सम्भवति। तच्च प्रकृत्या सह सम्पर्केण भवति। निश्चयात्मकशिक्षा केवलं पुस्तकानां रटने महत्वं प्रयच्छति, किन्तु रूसोमहोदयेन स्वानुभवेन स्पष्टः अधिगमः भवतीति उक्तम्।

**3.प्रगतिशीलशिक्षा** –

प्रकृतिवादः बालकं प्रौढत्वेन न स्वीकृत्य विकासशीलप्राणीवत् मनुते। बालकस्य वयाधारेण विकासस्य चतस्रःअवस्था रूसोमहोदयेन प्रतिपादिता। शैशवावस्था बाल्यावस्था किशोरावस्था वयस्कावस्था च। एताषां चतुर्णामवस्थानां भिन्नावश्यकताः भवन्ति। विकासस्य एताः अवस्थाः आरूह्य बालकस्य मानसिकविकासः भावात्मकविकासश्च सम्भवति। शिक्षायाः विकासः पूर्वोक्तावस्थाधारेण करणीयः। एकं बालकं वयस्कमिति मत्वा न व्यवहर्त्तव्यम्।

**4.बालकेन्द्रितशिक्षा** –

प्रकृतिवादिनः विषयकेन्द्रितशिक्षा, परीक्षाकेन्द्रितशिक्षा, अध्यापककेन्द्रितशिक्षा च स्थाने बालकेन्द्रितशिक्षा स्वीकृता। बालकस्य इच्छानुगुणम् आवशययकतानुसारं च शिक्षा प्रदेया। बालकः कदा पठिष्यति? किं पठिष्यति? इत्यादि विषये सः स्वतन्त्रः भवति। अतः शिक्षा प्रक्रिया बालकेन्द्रितशिक्षा भवेत्।

**5.पूर्णस्वातन्त्र्यम्** -

शिक्षाप्रक्रियायां बालकस्य पूर्णस्वातन्त्र्यम् स्यादिति प्रकृतिवादिनः वदन्ति। मनुष्यः स्वतन्त्ररूपेण जन्मग्रहणं करोति। अतः तस्य कृते स्वातन्त्र्यं नितरामपक्ष्यते। मनुष्यः स्वयं प्रकृत्या दूरं गच्छति, अतः परतन्त्ररूपेण जीवति। मनुष्यः स्वयं स्वस्य स्वातन्त्र्यं त्यक्त्वा परतन्त्रमालिङ्गति। एतत् सर्वं दृष्ट्वा रूसोमहोदयः प्राह- मानवजातेः श्मशानं भवति नगराणि इति। अतः बालकस्य व्यक्तित्वविकासार्थमुन्मुक्तं वातावरणमपेक्षते। ते पूर्णरूपेण स्वातन्त्र्यं प्राप्नुयुः तेषां विकासार्थमात्मभिव्यक्त्यर्थं मार्गप्राप्त्यर्थं चेति।

**6.इन्द्रियप्रशिक्षणम् –**

बालकस्याधिगमः स्वानुभवेन भवति। एतदर्थं सः स्वस्य इन्द्रियाणां समुचितं प्रयोगं कुर्यात्। अतः बालकस्य इन्द्रियप्रशिक्षणस्यावश्यकता वर्त्तते। रूसो महोदयः वदति यत् शिक्षायाम् इन्द्रियाणां समुचितप्रयोगं कृत्वा ज्ञानस्य द्वारं समुद्घाटनीयम्।

**निषेधात्मकशिक्षानुसारं शिक्षायाः उद्देश्यम् –**

- बालकस्य दुष्टतायाः कारणं शारीरिकदुर्वलता भवति। अतः बालकाय शारीरिकशिक्षा प्रदेया।
- इन्द्रियाणां प्रशिक्षणं करणीयम्। 5 तः 12 आयुयुक्तानां बालकाणां शिक्षायाः उद्देश्यम् इन्द्रियप्रशिक्षणं स्यात्।
- किशोरावस्थायां (12 तः 15) बालकाणां कृते नियमितशिक्षा प्रदेया।
- 15 तः 20 आयुषि युवावस्थायां बालकाणां भावात्मकविकासाय ध्यानं प्रदेयम्।
- वर्त्तमानसुखप्राप्तये बालकेभ्यः शिक्षा प्रदेया।

**पाठ्यक्रमः –**

पूर्वनिर्धारितपाठ्यवस्तूनामाधारेण पाठ्यचर्यायाः निर्माणमकृत्वा छात्राणां रुच्यनुगुणमावश्यकताञ्चाभिलक्ष्य पाठ्यचर्या निर्मातव्या। तादृशी शिक्षा न दातव्या या व्यवहारं नोपकुरुते जीवनसम्बद्धा च न भवेत्। अतः जीवनस्य कृते उपयोगिपाठ्यचर्या निर्मातव्या। एमैल् इत्याख्ये ग्रन्थे बालकस्य वयः दृष्ट्वा शिक्षा दातव्या इति रूसो अवदत्। पाठ्यचर्यायाः निर्माणं बालकस्य वयः दृष्ट्वा कृतवान्। तद्यथा –

**शैशवावस्था (जन्मतः 5 वर्षपर्यन्तम्)** –

अस्याम् अवस्थायां स्वाभाविकरूपेण बालकस्य अधिगमाय प्रयासः करणीयः। अत्र बालकस्य यथा एकस्याः प्रवृतेः विकासः स्यात्, येन अपराः प्रवृतयः जागिताः न भवेयुः।

**बाल्यावस्था (5 तः 12 वर्षपर्यन्तम्)** –

अस्याम् अवस्थायां शिक्षा निषेधात्मकशिक्षासिद्धान्ताधारिता भवति। अस्यां पाठ्यक्रमेऽपि पुस्तकानि न भवन्ति। रूसोमहोदयस्य निषेधात्मकशिक्षायाः तात्पर्यं बालकस्य मस्तिष्के बलात् निश्चितविचारस्य स्थाने तं स्वतन्त्ररूपेण स्वानुभवेन अधिगमाय अवसरः देयः। अनुभवेन इन्द्रियाणि विकसितानि भवन्ति। इन्द्रियाणां विकासेन मानसिकविकासः भवति। बालकः स्वेच्छानुसारं स्वतन्त्रतापूर्वकं च यदा अधिगच्छति, तदा सः नैके अनुभवाः स्वाभाविकरूपेण प्राप्नोति। अस्याम् अवस्थायां तस्मै शाब्दिकज्ञानं नैतिकज्ञानं च न प्रदेयम्।

**किशोरावस्था (12 तः 15 वर्षपर्यन्तम्)**–

छात्राणां केवलं पुस्तकस्य रटनमपेक्ष्या तस्मै कार्यशालायां कार्यं कर्त्तुं स्ववसरःप्रदेयः। येन तेषां समुचितरूपेण वृद्धिः विकासश्च सम्भवति। अतः पाठ्यक्रमे सङ्गीत-नृत्य-कला-सामाजिकविज्ञानादि विषयाः सम्मिलिताः स्युः।

**युवावस्था (15 तः 20 वर्षपर्यन्तम्) -**

अस्याम् अवस्थायां छात्राणां भावात्मकविकासाय पाठ्यक्रमे भावात्मकशिक्षा समावेशनीया।

**अध्यापनपद्धतिः** –

रूसो महोदयः छात्रकेन्द्रितशिक्षणपद्धतीनां समर्थनम् अकोरत्। शिक्षणे बालकस्य क्रियाः भावाः यथा व्यक्ताः स्युः तथा यत्नम् अकोरत्। अतः क्रिया द्वारा अधिगमः, अनुभवेन शिक्षणम्, मनोवैज्ञानिकसिद्धान्तैः शिक्षणञ्च निषेधात्मकशिक्षायाः अध्यापनपद्धतयः भवन्ति।

**अनुशासनम्** –

बालकस्य कृते पूर्णस्वातन्त्र्यं प्रदेयम्। बालकः प्रकृतौ जीवति, अतः सः प्रकृत्या सह सम्बन्धं स्थापयित्वा तया अनुशासितः भवति। अतः तस्मै दण्डो न देय इति रूसोमहोदयस्याशयः। पुनरप्युक्तम् – रे मनुष्य, मानवो भवतु, शिशुना प्रेम करोतु, तस्य क्रीडायाः, तस्य प्रसन्नतायाः तथा तस्य मृदुप्रवृत्तीनां प्रोत्साहनं करोतु। शिशोः अभिवृद्धेः विकासस्य च प्रक्रिया स्वाभाविकतया भवति। बालकाय स्वयं कार्यं कर्त्तुम् अवसरः दातव्यः। तेन सः स्वाभाविकीं स्थितिं जानीयात्। परिस्थितेः परिज्ञानं कृत्वा सः समस्यायाः परिहारं स्वयं कुर्यात्। बालकः यदि प्रकृतेः विरुद्धं किमपि कार्यं करोति तर्हि सः प्रकृत्या एव शासितः भवति।

**शिक्षकः** –

प्रकृतिः एव बालकस्य उत्तमशिक्षकः भवति। यदि अध्यापकः छात्रं शिक्षयामि इति चिन्तयति तर्हि तत् मिथ्या एव। बालकः स्वयं प्रकृत्या स्वानुभवेन शिक्षते। यतोहि शिक्षकः कमपि शिक्षयितुं न शक्नोति। रॉस शिक्षकस्य स्थानं स्पष्टयन्नाह – यदि शिक्षकस्य किमपि स्थानमस्ति तर्हि तत् रङ्गमञ्चस्य सन्नाहसम्पादक एव न तु स्वयं नटः इति। अध्यापकः बालकस्य विकासस्य निरीक्षकः भवति।

**छात्रः** –

बालकेन्द्रितशिक्षाव्यवस्था भवति निषेधात्मकशिक्षायाम्। अष्टादशशताब्द्यां फ्रेन्च फिलास्कर महोदयेन उक्तम्- बालकाय किं पठनीयमिति न शिक्षणीयं प्रत्युत अनुभवात्मकशिक्षणविधयः निषेधात्मकशिक्षां प्रति प्रेरयन्ति। निषेधात्मकशिक्षा बालकानां कृते उत्तमा प्रक्रिया भवति, किन्तु सामाजिकबन्धने पतित्वा दूषिता भवति। रूसोमहोदयस्य समये समाजे प्रचलितशिक्षाव्यवस्थायां छात्राणां योग्यतायाः रूचेश्च दमनं भवति स्म। एतत् सर्वं संलक्ष्य रूसोमहोदयेन निषेधात्मकशिक्षा प्रतिप्रादिता।विद्यालये एकेन उत्तमविधिना बालक-बालिकयोः वयाधारेण परिपक्वताधारेण च पृथक् शिक्षणव्यवस्था परिकल्पनीया। यतोहि एतेषां प्रकृतिः भिन्ना भवति।एतस्य सविस्तरं वर्णनं एमील इत्याख्ये ग्रन्थे सोफिया नाम्नी चरित्रं प्रदर्श्य कृतम्।

**वर्त्तमानप्ररिप्रेक्ष्ये शिक्षणप्रक्रियायां निषेधात्मकशिक्षायाः प्रासङ्गिकता**–

निषेधात्मिकशिक्षा शिक्षणमपेक्षा अधिगमस्य महत्त्वं स्वीकरोति। यदा बालकः प्रकृतेः कार्यं कारणञ्च सुष्ठुः अवगच्छति तदा एव अधिगमस्य प्रभावपूर्णं स्वरूपं प्रतिफलितं भवति। बालकः किं कुर्यात्? किं असत्यम्? इत्यादिषु विषयेषु तस्मै शिक्षा न प्रदीयते, किन्तु बालकः स्वयं परिस्थितिसन्दर्भे अधिगच्छति। यदा बालकः स्वयम् अधिगच्छति, तदा त्रुटिमाचरति, कष्टमनुभवति च। अनुभवोऽयं स्वज्ञानेन्द्रियैः प्राप्नोति, तेन वास्तविकाधिगमः जायते। प्रकृतिरेव तस्य शिक्षिका भूत्वा तमधिगमयति।सन्दर्भेऽस्मिन् रूसोमहोदयस्य एमीलइति ग्रन्थे द्रष्टुं शक्यते। अद्यापि एतादृशः शिक्षणविधिः अस्माकं समाजे समुपलभ्यते। यद्यपि एमील इत्यत्र प्रयुक्ताः शिक्षणविधयः अत्यधिकाः भवन्ति, तथापि विचारोऽयं साम्प्रतिकयुगे सुतराम् उपकारकः वर्त्तते। पितरौऽपि अमुं विषयं स्वीकुरुतः। विधिरयं समाजे सत्य-असत्ययोः भेदकरणे सहायको भवति। छात्रान् असकृत् किं करणीयम्? किं न करणीयम्? इत्यादि कथनं रूचिकरं न भवति। अतः रूसो कथयति – छात्रः सर्वदा त्रुटिभिः अधिगच्छेत्।

**शिक्षायाः अर्थः** –

सा शिक्षा उत्तमा शिक्षा या मनुष्यस्य अन्तः प्रस्फुटिता भवति। इयं व्यक्तेः अन्तर्निहितशक्तीनामभिव्यक्तिः वर्त्तते।शिक्षा प्रकृति प्रदत्ता वर्त्तते। शिक्षा बालकस्य शक्तीनां विकासरूपेण स्यात्। शिक्षा बालकाय स्यात् न तु बालकः शिक्षायै। रूसो महोदयेन प्रकृतिं मूलतत्त्वरूपेण स्वीकृत्य प्रकृतिमनुसरः इति शिक्षायाः मुख्यध्येयरूपेण प्रतिपादितः। वस्तुतः शिक्षा बालकस्य स्वभावानुसारं स्यात्।

**शिक्षायाः उद्देश्यम्** –

एमील इत्याख्ये ग्रन्थे रूसोमहोदयेन लिखितम् – जीवनस्योद्देश्यम् आनन्दप्राप्तिः। बालकः ज्ञानेन्द्रिय-अङ्ग-शक्तीनां सञ्चालनेन आनन्दं प्राप्नोति। अतः शिक्षायाः लक्ष्यं पठनं पाठनं च न स्यात्, अपितु तस्य सर्वेषु प्राकृतिककार्येषु सहयोगं प्रदाय विभिन्नशक्तीनां समुचितविकासनमेव शिक्षायाः लक्ष्यं स्यात्। रूसोमहोदयेन बालकस्य जीवनं चतुर्षु अवस्थासु विभज्य प्रत्येकं शिक्षावस्थायां शिक्षायाः उद्देश्यानि भिन्नानि प्रतिपादितानि। एवम्प्रकारेण निषेधात्मकशिक्षायाः उद्देश्यं साम्प्रतिकं मनोवैज्ञानिकशैक्षिकोद्देश्यवत् वर्त्तते।

**पाठ्यक्रमः** –

सर्वविध शिक्षायै एकः निश्चितः समयः निर्धारितः भवति। प्रत्येकं शिक्षायां विद्यमानान् दोषान् विज्ञाय ततः दूरे स्थातुं प्रयासः करणीयः। पाठ्यक्रमः अवस्थाजन्यः भवति। बालकस्य विकासस्य चतुर्णाम् अवस्थानां कृते चत्वारः मनोवैज्ञानिकपाठ्यक्रमाः भवन्ति।

**शिक्षणविधयः** –

इन्द्रियाणि ज्ञानस्य स्रोतांसि वर्त्तन्ते। एतन्मतं रूसो महोदयेन स्वीकृत्य अधिगमस्य अधोलिखिताः नवशिक्षणविधयः प्रतिपादितः। आधुनिकशिक्षापद्धतौ एतेषां प्रयोगः सुतरां भवत्येव । ते यथा –

- क्रियया अधिगमः

- अनुभवेन शिक्षणम्
- प्रशिक्षणेन अधिगमः

**अनुशासनम्** –

रूसोमहोदयस्य विचारः आसीत् यत् – ईश्वरेण निर्मितं प्रत्येकं वस्तुः उत्तमं भवति, किन्तु दूषितसमाजः तं कलुषितं करोति। एतन्मनसि निधाय तेन मुक्त्यात्मकानुशासनं मुक्तकण्ठेन स्वीकृतम्।

**शिक्षकः** –

या शिक्षा शिक्षककेन्द्रिता आसीत् तां शिक्षां रूसोमहोदयेन बालकेन्द्रितशिक्षारूपेण प्रतिपादिता। शिक्षकस्य मानसं मनोवैज्ञानिकपरिवर्तनेन प्रजातान्त्रिकं कृतम्।

**छात्रः** –

शिक्षायां छात्रः प्रमुखः भवति अतः शिक्षा छात्रकेन्द्रिता सञ्जाता।

**निषेधात्मशिक्षायाः शैक्षिकनिहितार्थः** –

निषेधात्मकशिक्षायाः निम्नोक्ताः शैक्षिकनिहितार्थाः भवन्ति –

- बालकं बालकवत् पाठनीयं न तु प्रौढवदिति न्यायेन पाठनप्रक्रिया प्रवर्त्तनीया।
- साम्प्रतं समाजे अनियन्त्रितमस्तिष्कक्रियाः अनैतिकवातावरणञ्च परिदृश्यते, तस्य मुख्यं कारणं भवति परिवारः परम्परानुसारेण प्रदीयमाना शिक्षा च। यदि बालकेभ्यः निषेधात्मकशिक्षानुसारं शिक्षा प्रदीयेत तर्हि सः स्वयं स्वमभिज्ञाय स्वरूच्यानुगुणं शिक्षायाः चयनं करिष्यति। किञ्च निषेधात्मकशिक्षायाःउद्देश्यं सर्वाङ्गीणविकासः भवति। अनया शिक्षया स्वानुभवेन जीवने साफल्यं प्राप्तुं शक्नोति।
- शिक्षाप्रक्रियायां दृश्यमानानां विकृतीनाम् दूरीकरणं निषेधात्मकशिक्षया कर्त्तुं शक्यते।
- शिक्षा बालकाय भवेत् न तु बालकः शिक्षायै इति ध्येयमाधृत्य शिक्षाव्यवस्था परिचालिता वर्त्तते।
- शिक्षा अनुभवकेन्द्रिता इन्द्रियप्रशिक्षणेन प्राप्ता वा सञ्जाता।
- साम्प्रतं विद्यालये मुक्त्यात्मकानुशासनं दरीदृश्यते।
- प्रशिक्षितैः अध्यापकैः शिक्षणकार्यं प्रवर्त्तते।
- शिक्षायां क्रीडा- व्यायामादीनां महत्त्वं स्वीकृत्य एतान् पाठ्यसहगामिक्रियात्वेन पाठ्यक्रमे स्वीकृतम्।
- नैतिकशिक्षायाः आधारः व्यावहारिकजीवनमेव भवतीति मन्यते।

**उपसंहारः** –

शिक्षायाः अर्थः व्यापकः विस्तृतश्चेति निश्चप्रचम्। वस्तुतः का शिक्षा बालकस्य निर्माणं करोतीति प्राचीनकालात् समेषां शिक्षाशास्त्रीणां मनसि प्रश्नः आसीत्। एतत् यक्षप्रश्नं सर्वैः दार्शनिकैः विचारकैः शिक्षाशास्त्रिभिः यथामतिं

चिन्तनाय प्रयासो विहितः। एतेषु प्रयासेषु रूसोमहोदयस्य प्रयासः अन्यतमः। यदि आधुनिकशिक्षांप्रकृतिवादस्य विचारानुगुणं परिचालयामः तर्हि साम्प्रतं शिक्षाक्षेत्रे परिदृश्यमानसमस्यायाः समाधानम कर्त्तुं शक्यते। यतोहिप्रकृतिवादस्य विचाराः मनोवैज्ञानिकानिकसिद्धान्तमाधृत्य प्रवर्त्तन्ते। इत्थम् आधुनिकशिक्षायां प्रकृतिवादस्य प्रभावः वर्त्तत इति शोधपत्रेऽस्मिन् मया प्रत्यपादि। अतः यदि प्रकृतिवादस्य शैक्षिकनिहितार्थान् वास्तविकरूपेण शिक्षाप्रक्रियायां समावेशनं कुर्मः, तर्हि शिक्षाप्रक्रियायां नवीनं परिवर्त्तनं सम्पादयितुं शक्यत इति शम्।

**ग्रन्थऋणम् –**


1. ओड. एल. के., शिक्षा की दार्शनिक पृष्टभूमि, राजस्थान हिन्दी ग्रन्थ अकादमी, जयपुर,1982
2. पाण्डेय, रामशकल, उदीयमान भारतीय समाज में शिक्षक, अग्रवाल पब्लिकेशन्स, आगरा, 2008
3. पाण्डेय, रामशकल, विश्व के श्रेष्ठ शिक्षाशास्त्री, अग्रवाल पब्लिकेशन्स, आगरा, 2008
4. रूहेला, एस.पी., उदीयमान भारतीय समाज में शिक्षा, अग्रवाल पब्लिकेशन्स, आगरा, 2008
5. वर्मा, निर्मल, विश्व के महान् शिक्षाशास्त्री, अमेगा पब्लिकेशन्स, नई दिल्ली, 2008
6. साहु, सोमनाथ, शिक्षायाः दार्शनिकाधाराः,जगदीश संस्कृत पुस्तकालय, जयपुर,2013